# Shri Sharada Devi Ashtakam

# શ્રીશારદાદેવ્યષ્ટકમ્

## Document Information

Text title : Shri Sharada Devi Ashtakam

File name : shAradAdevyaShTakam2.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Durgadasa Goswami

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદાદેવ્યષ્ટકમ્

પાદામ્ભોજરજઃ કણૈર્વસુમતીં કૃત્સ્નાં પુનન્તી સ્વકૈ-
    ર્જાતા યા શુભલક્ષણા જનગણક્ષેમાય સૌમ્યાકૃતિઃ ।
બઙ્ગાન્તર્જયરામવાટ્યભિહિતે ગ્રામે દ્વિજસ્યાન્વયે
    વન્દે તાં ખલુ શારદામણિમહં શ્રીરામકૃષ્ણપ્રિયામ્ ॥ ૧॥

યાં માતાં પથિ દસ્યુરપ્યવનતઃ ક્રૌર્યં નિરસ્યાદવાદ્
    દ્રાગઙ્ગીકૃતવાંશ્ચિરાય દુહિતેત્યાખ્યાય મોહાત્યયાત્ ।
સેવાદ્યૈરચિરાત્ પ્રસાદ્ય દયિતસ્થાનં તથા નીતવાન્
    વન્દે તાં ખલુ શારદામણિમહં શ્રીરામકૃષ્ણપ્રિયામ્ ॥ ૨॥

પૂર્વં કલ્પિતયા વિવાહવિધયે દૈવેન સદ્વૃત્તયા
    બધ્વા શિક્ષિતયાત્મના સ્વમનસો વાઞ્છાનુરૂપં શનૈઃ ।
શુદ્ધાત્માપિ પતિર્યયા શુચિતરો જાતઃ કૃતાર્થોઽપ્યહો
    વન્દે તાં ખલુ શારદામણિમહં શ્રીરામકૃષ્ણપ્રિયામ્ ॥ ૩॥

ચિત્રં ભોઃ ફલહારિણીતિથિરજન્યર્ઘે સ્વ સિદ્ધેઃ ફલં
    પૂજાન્તે પુરુષોત્તમેન ગુરુણા યસ્યૈ રહસ્યાર્પિતમ્ ।
ષોડશ્યૈ વિધિવત્ ત્રિલોકજનની બુદ્ધ્યા જપાક્ષસ્રજા
    વન્દે તાં ખલુ શારદામણિમહં શ્રીરામકૃષ્ણપ્રિયામ્ ॥ ૪॥

યસ્યા નો દ્વિજતે સ્મ જીવનિવહઃ શિષ્યા નરેન્દ્રાદયઃ ।
    પ્રાપ્યાજ્ઞામપિ સમ્ભ્રમાદપિ ભયાત્ પ્રીત્યાન્વતિષ્ઠન્નપિ ।
લીયન્તે રિપવઃ પ્રણશ્યતિ ભવઃ શાન્તિશ્ચ સઞ્જાયતે ।
    વન્દે તાં ખલુ શારદામણિમહં શ્રીરામકૃષ્ણપ્રિયામ્ ॥ ૫॥

સેવાપ્રેમ દયાત્રપામતિ કથા યસ્યાઃ પરં ગીયતે ।
    શ્રદ્ધાભક્તિભરાજ્જનૈરહરહઃ પારેઽબ્ધિ રાષ્ટ્રેષ્વપિ ।
કારુણ્યં નયનેઽભયં કરતલે મુક્તિશ્ચ પાદામ્બુજે ।
    વન્દે તાં ખલુ શારદામણિમહં શ્રીરામકૃષ્ણપ્રિયામ્ ॥ ૬॥

યસ્યાં સ્નેહનિધૌ પ્રકામવિનતાઃ સૌજન્યમુગ્ધાન્તરાઃ ।
સાધ્વીસઙ્ઘશિરોમણૌ પૃથુતપો નિષ્ઠામ્બુધૌ સજ્જનાઃ ।
સ્વેષામાદધતિ પ્રસન્નપ્રવદનાઃ સર્વસ્વમપ્યાર્તિતો ।
વન્દે તાં ખલુ શારદામણિમહં શ્રીરામકૃષ્ણપ્રિયામ્ ॥ ૭॥

માતર્માતરયે ! કૃપામયિ ! ધરોદ્ધારાર્ધમભ્યાગતે !
ત્રાયસ્વેહ સુતાનનાથપતિતાંસ્તત્પાદપદ્માશ્રિતાન્ ।
સમ્પ્રાર્થ્યેતિ વરં ક્રમાદુપગતાઃ પ્રાચ્યાઃ પ્રતીચ્યાશ્ચ યાં
વન્દે તાં ખલુ શારદામણિમહં શ્રી રામકૃષ્ણપ્રિયામ્ ॥ ૮॥

શ્રી શારદાફુલ્લપદારવિન્દે લગ્નો યથાલિર્મકરન્દમત્તઃ
અત્યાલ્પધી-માતૃકૃપાર્થિ-દુર્ગાદાસાસ્તૃતોઽસ્તુ સ્તવ એષ શસ્તઃ ॥ ૯॥

ઇતિ અધ્યાપકશ્રીદુર્ગાદાસગોસ્વામીવિરચિતં “શ્રીશ્રીશારદાદેવ્યષ્ટકમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Sharada Devi Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*